GOVT. BRENNEN COLLEGE CENTRAL LIBRARY THALASSERY

**K17U 0601**

Reg. No. : ..............................

Name : ..................................

**IV Semester B.A. Degree (CBCSS – Reg./Supple./Imp.) Examination, May 2017**
**(2014 Admn. Onwards)**
**Core Course in Sanskrit**
**4B06 SKT : GADYASAHITYAM**

Time : 3 Hours                                                                 Max. Marks : 40

*सूचना : सर्वे प्रश्नाः संस्कृतभाषयैव समाधेयाः। देवनागरीलिपिरुपयोक्तव्या।*

I. वाक्येन वाक्याभ्यां वा दशानामुत्तरं लिखत।                                   **(10×1=10)**

1) गद्यकाव्यस्य भेदौ कौ ?

2) बाणविरचितौ ग्रन्थौ कौ ?

3) 'प्रायेण हि पक्षिणः पशवश्च भयाहारनिद्रासंज्ञामात्रवेदिनो भवन्ति' – क एवं वदति ? कदा ?

4) वासवदत्ता केन विरचिता ? कस्मिन् विभागे अन्तर्भवति ?

5) बाणभट्टः कस्मिन् राज्ये कस्य राज्ञः सभां अलंचकार ?

6) जाबालिः कस्य पिता आसीत् ?

7) 'स्वस्यैवाविनयस्य फलमनेनानुभूयते' – कः कमुदिश्यैवं अवादीत् ?

8) वैशम्पायनः कथं जाबालेराश्रमं प्राप्तः ?

9) विहङ्गराजेन पठिता आर्या का ?

10) गद्यं कवीनां निकषं वदन्तीत्यस्य आशयः कः ?

11) कादम्बर्याः उत्तरभागः केन श्चितः ?

12) विदिशा कस्य राजधानी आसीत् ?

II. द्वे व्याख्यात।                                                                  **(3×2=6)**

13) मां तु स्वल्पत्वाद्भयसंपिण्डिताङ्गत्वात्सावशेषत्वाच्चायुषः कथमपि पक्षसंपुटान्तरगतं नालक्षयत्। उपरतं चतमवनितले शिथिलशिरोधरमधोमुखममुञ्चत्। अहमपि तच्चरणान्तरे निवेशितशिरोधरो निभृतमङ्कनिलीनस्तेनैव सहापतम्।।

P.T.O.

14) अनया च कालकलया सुदूरमतिक्रान्त: स पापकृदिति परिकलय्य किञ्चिदुन्नमितकन्धरो भयचकितया हशा दिशोऽवलोक्य तृणेऽपि चलति पुन: प्रतिनिवृत्त इति तमेव पदे पदे पापकारिणमुत्प्रेक्षमाणो निष्क्रम्य तस्मात् तमालतरुमूलात् सलिलसमीपं सर्तुं प्रयत्नमकरवम् ।।

15) अहो प्रभावस्तपसाम्। इयमस्य शान्तापि मूर्तिरुत्तप्तकनकावदाता परिस्फुरन्ती सौदामिनीव चक्षुष: प्रतिहन्ति तेजांसि। सततमुदासीनापि महाप्रभावतया भयमिवोपजनयति प्रथमोपगतस्य। शुष्कनलकाशकुसुमनिपतितानलचटुलवृत्ति नित्यमसहिष्णु तपस्विनां तनुतपसां अपि तेज: प्रकृत्या भवति।

16) अपरसागराम्भसि पतिते दिवसकरे वेगोत्थितमम्भ:सीकरनिकरमिव तारागणमम्बरमधारयत्। अचिराच्च सिद्धकन्याकाविक्षिप्तसन्ध्यार्चनकुसुमशबलमिव तारकितं वियदराजत। क्षणेन चोन्मुखेन मुनिजनेनोर्ध्वविप्रकीर्णै: प्रणामाञ्जलिसलिलै: क्षाल्यमान इवागलदखिल: सन्ध्याराग: ।।

III. चतुर्णां लघूपन्यासं लिखत। **(3×4=12)**

17) सन्ध्यावर्णनम्।

18) हारीत:।

19) शूद्रक:।

20) शबरसेनापति:।

21) शुकोत्पत्ति:।

22) अगस्त्याश्रम:।

IV. द्वे उपन्यस्यत। **(6×2=12)**

23) 'बाणोच्छिष्टं जगत्सर्वं' इत्युक्ते: साधुतां समग्रं शोधयत।

अथवा

बाणस्य वर्णनापाटवं पम्पावर्णनानुसारं समर्थयत।

24) शुकप्रशंसां यथाग्रन्थं निरूपयत।

अथवा

जाबालेराश्रमं बाणोक्तरीत्या वर्णयत।